कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक

हस्तलिखित संग्रह

दाखल क्र M2382-(2) विषय अष्टनासिकलक्षण

नाव कुलदान्तारिणालक्षणम

लेखक/लिपीकार जगन्नाथदास

पृठ .... काळ 1943 पूर्ण/अपूर्ण

श्रीगणेशाय नमः ॥ श्रीसरस्वत्यै नमः ॥ श्रीगुरुभ्यो नमः ॥ प्रणम्य लक्ष्मीनृहरिं महागणपतिं गु म॰
रुं ॥ तंत्राण्यनेकान्यालोक्य वक्ष्ये मंत्रमहोदधिं ॥१॥ प्रातरुत्थाय शिरसि ध्यात्वा गुरुपदां
बुजं ॥ आवश्यकं विनिर्वर्त्य स्नात्वा तु यायात्सरित्तटे ॥२॥ श्रौतेन विधिना स्नात्वा मंत्रस्नानं
समाचरेत् ॥ स्मार्तसंध्यां मंत्रसंध्यां कृत्वा देवं विचिंतयन् ॥३॥ गृहद्वारमथागत्य द्वारपूजां
समाचरेत् ॥ द्वारमस्त्रांबुना प्रोक्ष्य गणेशं चोर्ध्वतो यजेत् ॥४॥ महालक्ष्मीं दक्षभागे वामभा
गे सरस्वतीं ॥ पुनर्दक्षे यजेद्विघ्नं गंगां च यमुनामपि ॥५॥ पुनर्वामे क्षेत्रपालं स्वं सिंधु यमु
नेऽप्यपि ॥ पुनर्दक्षे तु धातारं विधातारं तु वामतः ॥ तैद्वन्निधीशं खपद्मौ ततोर्चेत् द्वारपालका
॥२॥ न् ॥ द्वारपूजां विधायेत्थं प्रविश्यार्चनमंदिरं ॥७॥ उपविश्यासने नत्वा गणेशगुरुदेवताः ॥ ॥२॥
प्राणानायम्य तारेण पूरकुंभकरेचकैः ॥८॥ द्वात्रिंशता चतुःषष्ट्या क्रमात्षोडशसंख्यया ॥
देवार्चायोग्यता प्राप्त्यै भूतशुद्धिं समाचरेत् ॥९॥ मूलाधारस्थितां देवीं कुंडलीं परदेवतां ॥
बिसतंतुनिभां विद्युत्प्रभां ध्यायेत्समाहितः ॥१०॥ मूलाधारात्समुत्थाय संगता हृदयांबुजं ॥
सुषुम्नामार्गमाश्रित्यादाय जीवं हृदंबुजात् ॥११॥ दीपकलिकाकारां ब्रह्मरंध्रगतां स्मरेत् ॥ खबीजं
ब्रह्मणि संयोज्य हंसमंत्रेण साधकः ॥१२॥ पादादिब्रह्मरंध्रांतस्थितं भूतगणं स्मरेत् ॥ स्वव
र्णबीजाकृतिभिर्युक्तं तद्विधिरुच्यते ॥१३॥ पादादिजानुपर्यंतं चतुःकोणं सवज्रकं ॥ भूबी

जं स्वर्णवर्णं च स्मरेद्धवनिमंडलं ॥१४॥ जान्वाद्या नाभिपर्यंतं चंद्रार्द्धनिभं पद्मद्वयांकितं ॥ वंबीजयु
क्तं श्वेताभमंभसो मंडलं स्मरेत् ॥१५॥ नाभेर्हृदयपर्यंतं त्रिकोणं स्वस्तिकान्वितं ॥ रंबीजेन यु
तं रक्तं स्मरेत् पावकमंडलं ॥१६॥ हृदो भ्रूमध्यपर्यंतं वृत्तं षट्बिंदुलांछितं ॥ यंबीजयुक्तं धूम्रा
भं नभस्वन्मंडलं स्मरेत् ॥१७॥ आब्रह्मरंध्रं भ्रूमध्याद्वृत्तं स्वच्छं मनोहरं ॥ हंबीजयुक्तमाकाशमं
डलं प्रविचिंतयेत् ॥१८॥ यद्हस्तपायूपस्थाश्च वाक् क्रमाद्ध्येया धरादिगाः ॥ स्वकीयविषयैर्युक्ता ग
मनग्रहणादिभिः ॥१९॥ घ्राणं च रसना चक्षुः स्पर्शनं श्रोत्रमिंद्रियं ॥ क्रमाद्ध्येयं धराधिष्ठं गं
धादिगुणसंयुतं ॥२०॥ ब्रह्मविष्णुशिवेशाना सदाशिव इतीरिताः ॥ धरादिभूलसंघेशाध्ये
यास्तन्मंडलेषु ते ॥२१॥ निवृत्तिश्च प्रतिष्ठापि विद्या शांतिश्चतुर्थिका ॥ शांत्यतीतेति पंचैव कला
ध्येया धरादिगाः ॥२२॥ समानोदानव्यानाश्चापानप्राणौ च वायवः ॥ धरादिमंडलगताः पं
च ध्येयाः क्रमादिमे ॥२३॥ एवं भूतानि संचिंत्य प्रत्येकं प्रविलापयेत् ॥ भुवं जले जलं वन्हौ वन्हिं
वायौ नभस्यमुं ॥२४॥ विलाप्य खमहंकारे महत्तत्वेप्यहंकृतिं ॥ महांतं प्रकृतौ मायामात्मनि प्रवि
लापयेत् ॥२५॥ शुद्धः सच्चिन्मयो भूत्वा चिंतयेत् पापपूरुषं ॥ दक्षकुक्षिस्थितं कृष्णमंगुष्ठपरिमा
णं ॥२६॥ विप्रहत्या शिरोयुक्तं कनकस्तेयबाहुकं ॥ मदिरापानहृदयं गुरुतल्पकटीयुतं ॥२७॥
पापसंयोगपद्द्वंद्वमुपपातकरोमकं ॥ खड्गचर्मधरं दुष्टमधोवक्त्रं सुदुःसहं ॥२८॥ वायुबीजं

स्मन्वायुं संपूर्येनं विशोषयेत् ॥ स्वशरीरयुतं मंत्री वह्निबीजेन निर्दहेत् ॥ २९ ॥ कुंभके परिजप्तेन सूहोधि०
मंत्र० ततः पापनरोद्भवं ॥ बहिर्भस्म समुत्सार्य वायुबीजेन रेचयेत् ॥ ३० ॥ सुधाबीजेन देहोत्थभस्म
संप्लावयेत्सुधीः ॥ भूबीजेन घनीकृत्य भस्म तत्कनकांडवत् ॥ ३१ ॥ विशुद्धमुकुराकारं जप
न्बीजं विहायसः ॥ मूर्द्धादिपादपर्यंतान्यंगानि रचयेत्सुधीः ॥ ३२ ॥ आकाशादीनि भूतानि
पुनरुत्पादयेत्ततः ॥ सोहं मंत्रेण चात्मानमानयेत्हृदयांबुजे ॥ ३३ ॥ कुंडलीजीवमादाय प
रसंगात्सुधामयं ॥ संस्थाप्य हृदयांभोजे मूलाधारगतां स्मरेत् ॥ ३४ ॥ भूतशुद्धिं विधायेवं
॥२॥ प्राणस्थापनमाचरेत् ॥ प्राणप्रतिष्ठामंत्रस्य मुनयोजेशपद्मजाः ॥ ३५ ॥ छंदो ऋग्यजुषं
सामप्राणाशक्तिस्तु देवता ॥ पाशोबीजं त्रपाशक्तिर्विनियोगासुसंस्थितौ ॥ ३६ ॥ ऋषीन् शि ॥२॥
रसि वक्त्रे तु छंदांसि हृदि देवता ॥ गुह्ये बीजं पदोः शक्तिं न्यस्य कुर्यात्षडंगकं ॥ ३७ ॥ कवर्ग
नभ आद्यैर्हृत् चशब्दाद्यैः शिरःस्मृतं ॥ टआद्यैः शिखा प्रोक्ता तथा गाद्यैस्तनुच्छदं ॥ ३८ ॥
पच क्ष्व्यादिभिर्नेत्रमस्त्रं येनांतरींद्रिये ॥ आत्मने तान्मनूनांगान्विन्यसेद्धृदयादिषु ॥ ३९ ॥
पंचमं प्रथमं पश्चात् द्वितीयं च चतुर्थकं ॥ तृतीयमिच्छे क्रमतो वर्गवर्णान्समुच्चरेत् ॥ ४० ॥
यवर्गेष्वेव मुख्यार्णनभः श्वेतांतिमो भृगुः ॥ विमलश्चेति चोचार्याः क्षमा दुर्गाः संविदवः
४१ ॥ नभोवाय्वग्निवाभूमि नभआद्य ईरिताः ॥ शब्दस्पर्शरूपरसगंधाः शब्दादयो मताः ॥
४२ ॥ श्रोत्रं त्वक्चक्षुषी जिह्वा घ्राणा श्रोत्रादयः स्मृताः ॥ वाक्पाणिपादपायूनां पस्थो भागा

दयः पुनः॥ वक्त्व्यादानगमनविसर्गानंदसंज्ञकाः॥ वक्त्व्याद्या बुद्धिमनोहंकाराश्चित्त
संयुताः॥४४॥ अंतरिंद्रियसंज्ञास्युरेवमुक्तं षडंगकं॥ नाभेरारभ्य पादांतं पाशबीजं प्रविन्यसे
त्॥४५॥ नाभ्यंतं हृदयाच्छक्तिं हृदंतं मस्तकात्सृणिं॥ त्वगसृङ्मांसमेदोस्थिमज्जाशुक्राणि
विन्यसेत्॥४६॥ आत्मने हृदयांतानि यादि सक्षांतिकान्यपि॥ ॐजः सद्यान्विताकाशपूर्वश्री
पांतु खादिकं॥४७॥ भृग्वादिकं न्यसेज्जीवमेतान् हृदयदेशतः॥ यकाराद्या आद्यवर्णाः स
र्वेस्युश्चंद्रभूषिताः॥४८॥ ततः समस्तमूलेन मूर्द्धादिचरणावधि॥ विधाय व्यापकन्यासं वि
न्यसेत्पीठदेवताः॥४९॥ मंडूकश्चाथ कालाग्निरुद्र आधारशक्तियुक्॥ कूर्मोनंतो धरासिंधुः
श्वेतद्वीपं सुरांघ्रिपः॥५०॥ मणिहर्म्यं हेमपीठं धर्मो ज्ञानं विरागता॥ ऐश्वर्यं धर्मपूर्वास्तु व
त्वारस्तेन आदिकाः॥५१॥ धर्मादयः स्मृताः पादाः पीठगात्राणि वै नरे॥ मध्ये नंतस्तत्वपद्म
आनंदमयकंदकः॥५२॥ सविन्नालं ततः प्रोक्ता विकारमयकेसराः॥ प्रकृत्यात्मकपत्राणि
पंचाशद्वर्णकर्णिका॥५३॥ सूर्यस्येंदोः पावकस्य मंडलत्रितयं ततः॥ सत्वं रजस्तमः पश्चा
दात्मा पुक्तोंतरात्मना॥५४॥ परमात्माथ ज्ञानात्मा तत्वमायाकलादिके॥ विद्यातत्वं परंतत्व
कथिताः पीठदेवताः॥५५॥ पूजने सर्वदेवानां पठिताः परिपूजयेत्॥ न्यासस्थानानि चैताभिः
शरीरे बहिरर्चने॥५६॥ पूजांतरंगे वक्ष्यंते सेंद्राद्यर्णयुताश्च ताः॥ आधारशक्तेस्ततः पूज्यास्त्र

म.त्र० ह्रौपीठस्य शक्तयः॥ हृदयांभोजपत्रेषु नवमीत्वधिकर्णिकं॥ जयाख्या विजया पश्चादजिता चाप महा०
राजिता॥५८॥ नित्या विलासिनी दोग्ध्री त्वघोरा मंगलांतिमा॥ पाशादिबीजत्रितयं प्रोच्य पीठं
दिशेत्ततः॥५९॥ एवं देहमये पीठे न्यसेद्देवीमसुप्रदां॥ नवयौवनगर्वाढ्यां पीवरस्तनशोभि
नीं॥६०॥ पाशचापासृक्कपाले सृणीपूनूभूलं हस्तैर्बिभ्रतीं रक्तवर्णां॥ रक्तोदन्वत्पोतरक्तां
बुजस्थां देवीं ध्यायेत्प्राणशक्तिं त्रिनेत्रां॥६१॥ अष्टपत्रस्थषट्कोणध्यास्वेवं पूजयेन्नुतां॥ प्रा
ग्रक्षो वायुकोणेषु ब्रह्मविष्णुशिवान्यजेत॥६२॥ अग्निवारुणपाशे चेषु वाणीलक्ष्मी हिमाद्रिजाः
केसरेषु षडंगानि पत्रेष्वष्टौ तु मातरः॥६३॥ ब्राह्मी माहेश्वरी चापि कौमारी वैष्णवी तथा॥ वारा
॥३॥ ही च तथेंद्राणी चामुंडा सप्तमी मता॥६४॥ अष्टमी तु महालक्ष्मीः प्रोक्ता विश्वस्य मातरः॥ स्व ॥३॥
तापूजने प्राचीमध्ये पूजकपूज्ययोः॥६५॥ इंद्रादयः स्वदिक्ष्वेषु च पूजनीया दिगीश्वराः॥ इं
द्रः कृशानुः कीनाशो निर्ऋतिर्वरुणोनिलः॥६६॥ सोम ईशाननामाधो नंतऊर्ध्वेचतुर्मुखः॥
ततइंद्रादिकाष्ठासु पूज्या दिक्पालहेतयः॥६७॥ वज्रं शक्तिर्दंडखड्गौ पाशांकुशगदे अपि॥ त्रि
शूलचक्रपद्मानि दशादिक्पालहेतयः॥६८॥ एवमिष्ट्वा प्राणशक्तिं पंचावरणसंयुतां॥ ध्याय-
न्हृदि कैरंध्रेसा त्रिजपेत्तन्मनुं सुधीः॥६९॥ वक्ष्येधुना मनोस्तस्योद्धारं धार्तसुखावहं॥ पाशं
मायां सृणिं प्रोच्य यादीन्सप्तेंदुसंयुतान्॥७०॥ ताराचितं नमः सप्तवर्णं मंत्रं ततो जपं॥ मम
प्राणा इह प्राणा मम जीव इह स्थितः॥७१॥ मम सर्वेन्द्रियाण्युक्त्वा मम वाङ्मनईरयेत्॥ चक्षुःश्रो

त्रघ्राणपदान्प्राणाइहसुसमीरयेत् ॥ ७२ ॥ आगत्यसुखमुच्चार्यचिरंतिष्ठंत्विदंपठेत् ॥ वन्हिजा
यांचसप्तार्णंमंत्रमंतेपुनर्वदेत् ॥ ७३ ॥ प्राणप्रतिष्ठामंत्रोयंस्मृतःप्राणनिधापने ॥ ममेत्यस्य
पदस्यादौपाशादीनिसमुच्चरेत् ॥ ७४ ॥ यंत्रेषुप्रतिमादौवाप्राणस्थापनमाचरन् ॥ ममस्थाने
तस्यतस्याःषष्ठ्यंतामभिधांवदेत् ॥ ७५ ॥ सं बिंदवो मेरु हंसाः काशाः सगउभृगुः पुनः ॥ माये
तिनाररुद्रोयंमंत्रःसप्ताक्षरोमतः ॥ ७६ ॥ एवंप्राणान्प्रतिष्ठाप्यमातृकान्यासमाचरेत् ॥ अका
राद्याःक्षकारांतावर्णाःप्रोक्तातुमातृका ॥ ७७ ॥ प्रजापतिर्मुनिस्तस्यागायत्रीछंदईरितं ॥ सर
स्वतीदेवतोक्ताविनियोगोखिलाप्तये ॥ ७८ ॥ हलोबीजानिवोक्तानिस्वराशक्तयईरिताः ॥ मू
र्ध्निवक्त्रेहृदिन्यस्येदृष्यादीन्साधकोत्तमः ॥ ७९ ॥ पंचवर्गैर्यादिभिश्चषडंगानिसमाचरेत् ॥
क्लीबहीनशशांकाढ्यह्रस्वदीर्घाक्षरान्वितैः ॥ ८० ॥ सानुस्वरैर्जातियुक्तैर्ध्यायेद्देवींततोबुधः ॥
पंचाशद्वर्णैरचितांगभागांधृतेंदुखंडांकुमुदावदातां ॥ वराभयेपुस्तकमक्षसूत्रंभजेगिरंसंदधतीं
त्रिनेत्रां ॥ ८१ ॥ ध्यात्वैवंपूजयेत्पीठदेवताःपूर्वमीरिताः ॥ पीठशक्तीस्तदुपरिसरस्वत्यासनंयाव
येत् ॥ ८२ ॥ मेधाप्रज्ञाप्रभाविद्याधीधृतिस्मृतिबुद्धयः ॥ विद्येश्वरीतिसंप्रोक्तामातृकापीठ
शक्तयः ॥ ८३ ॥ वियद्भृगुस्थंमनुयुक्विसर्गाढ्यंचमातृका ॥ योगपीठायनस्त्यंततोमनुरासनंद
शने ॥ ८४ ॥ मूर्त्तिसंकल्प्यमूलेनतस्यांवाणींप्रपूजयेत् ॥ आवाह्यंगानिसंपूज्यद्वितीयेपूज

मं० पेत्स्वरौ ॥८५॥ द्वौ द्वौ तृतीये वर्गांश्च वर्गशान्ती श्च तुर्यके ॥ व्यापिनी पालिनी चापि पावनी क्ले
दिनी पुनः ॥८६॥ धारिणी मालिनी पश्चाद्धंसिनी शाकिनी तथा ॥ वर्गशश्च कयट्लक्का पंच महो०
मेत्वष्ट मातरः ॥८७॥ षष्ठे शक्राद्यो देवाः सप्तमे वज्रपूर्वकाः ॥ इत्थं संपूज्य देवेशीं न्यसेद्व
र्णान्निजांगके ॥८८॥ ललाटमुखवृत्ते क्षिश्रवो नासो सुगंडयोः ॥ ओष्ठयोर्दंतपङ्क्त्यो
श्च मूर्ध्नि वक्त्रे न्यसेत्स्वरान् ॥८९॥ बाह्वोः संधिषु साग्रेषु कवर्गौ न्यसेत्सुधीः ॥ टतवर्गौ
पदोस्तद्वत्पार्श्वयोः पृष्ठदेशतः ॥९०॥ नाभौ कुक्षौ पवर्गं च हृदंसककुदंसतः ॥ न्यस्य यादि
चतुर्वर्णान्नृशादिषट्कं ततो न्यसेत् ॥९१॥ हृदादिकरयोरंध्र्यो जठरे वदने तथा ॥ सृष्टिन्या
॥५॥ संविधायेवं स्थितिं न्यासं समाचरेत् ॥९२॥ ऋषिः छंदश्च पूर्वोक्तिं देवता विश्वपालिनी ॥ उप ॥५॥
विष्टां वल्लभांके ध्यायेद्देवीमनन्यधीः ॥९३॥ मृगबालं वरे विद्यामक्षसूत्रं दधत्करैः ॥ मा
लाविद्यालसद्धस्तां वहन्ध्येयः शिवो गिरं ॥९४॥ एवं ध्यात्वा उकाराद्यान्वर्णान्यंगेषु विन्यसे
त् ॥ गुल्फादि जानुपर्यंतां स्थितिन्यासोयमीरितः ॥९५॥ न्यासे संहारसंज्ञे तु ऋषिश्छंदश्च पूर्व
वत् ॥ संहारिणी सपत्नानां शारदा देवता स्मृता ॥९६॥ अक्षस्रक्टंकसारंगविद्या हस्तां त्रिलो
चनां ॥ चंद्रमौलिं कुचनतां रक्ताब्जस्थां गिरिं भजे ॥९७॥ ध्यात्वैवं विन्यसेद्वर्णान्क्षाद्यानां ता
विलोमतः ॥ सृष्टिन्यासे तु सर्गांता सर्गबिंदुं तिकास्थितो ॥९८॥ बिंदूना संहृतौ वैषा पूर्ववद्यां
गपूजने ॥ न्यस्याः सर्वत्र नत्यंतानर्णा वा तारसंपुटाः ॥९९॥ सृष्टिन्यासं स्थितिन्यासं पुनः

कुर्यात्प्रयत्नतः ॥ अन्येतु मातृकान्यासाः कथ्याः पूजांतरं क्रमे ॥१००॥ मंत्रस्नानादि विधयो
गद्यास्तत्रैव तेमया ॥ भारतीमेव माराध्य भवेदिष्टान्मनून्सुधीः ॥१॥ विष्णुः शिवो गणेशोर्को दु
र्गा पंचैव देवताः ॥ आराध्याः सिद्धिकामेन तत्तन्मंत्रैर्यथोदितैः ॥२॥ आदौ देवं वशीकर्तुं पुर
श्चरणमाचरेत् ॥ तीर्थादौ निर्जने स्थाने भूमिग्रहणपूर्वकं ॥३॥ नवधा तां धरां कृत्वा पूर्वादि
षु समालिखेत् ॥ कोष्ठेषु सप्तवर्गांश्च लक्षौ मध्ये तथा स्वरान् ॥४॥ क्षेत्रमानादिमो वर्णो यत्र को
ष्ठे भवेत्ततः ॥ उपविश्य जपं कुर्यान्नान्यस्मिन्दुःखदे स्थले ॥५॥ आमध्याह्नं जपं कुर्यादुपांशु वा
थमानसं ॥ हविष्यं निशि भुंजीत त्रिस्नायी प्यभ्यंगवर्जितः ॥६॥ व्यग्रतालस्यनिष्ठीवक्रोधपा
दप्रसारणं ॥ अन्यभाषां त्यजेद्धीमांत्रे जपकाले त्यजेत्सुधीः ॥७॥ स्त्रीशूद्रभाषणं निंदां तांबूलं श
यनं दिवा ॥ प्रतिग्रहं निसर्गं तु कौटिल्यं वर्जयेत्सदा ॥८॥ भूशय्यां ब्रह्मचर्यं च त्रिकालं देवता
र्चनं ॥ नैमित्तिकार्चनं देवस्तुतिं विश्वासमाश्रयेत् ॥९॥ प्रत्यहं प्रत्यहं तावन्नैव न्यूनाधिकं क्वचित् ॥
एवं जपं समाप्याथ तद्दशांशं होममाचरेत् ॥१०॥ तत्तत्कल्पोदितद्रव्यैस्तद्विधानमुदीर्यते ॥ प्राणाया
मं षडंगं च कृत्वा मूलेन मंत्रवित् ॥११॥ कुंडे वा स्थंडिले कुर्यात्संस्काराणां चतुष्टयं ॥ मूलेनेक्षणमंत्रे
स्त्रेण प्रोक्षणं ताडनं कुशैः ॥१२॥ वर्मणाभ्युक्षिनाभिषिंच्य लिखेद्यंत्रं ततः परं ॥ वन्हिकोणं षडस्राष्टदल
भूमं द्विरात्मकं ॥१३॥ मध्ये तारपुटां मायां लिखित्वा पीठमर्चयेत् ॥ मंडूकात्परतत्वांतं पीठशक्ती
र्नवाग्निकाः ॥१४॥ वामाद्याः शीवा ग्लांश्वरयोर्योगपीठासनेनमः ॥ मायादिकैः पीठमंत्रस्तयोस्तेनास

मं॰ नंदिशेत् ॥१५॥ यजेत्तौ तारमायाभ्यां गंधाद्यैरुपचारकैः ॥ लक्ष्मीनारायणौ स्वर्चे वैश्वे वे होमकर्म महा॰ ८
णि ॥१६॥ सूर्यकांतादरणितः श्रोत्रियागारतोपि वा ॥ पात्रेणापिहितं पात्रे वन्हिमानापयेत्ततः ॥१७॥
अस्त्रेणादाय तत्पात्रं वर्मणोद्घाटयेत्ततुं ॥ अस्त्रमंत्रेण नैरृत्यां क्रव्यादांशं परित्यजेत् ॥१८॥ मू
लेन परितो दृष्ट्वा संस्कारांश्च चतुर्थ्यरेत् ॥ वीक्षणाद्यान्पुराप्रोक्तान्तुल्यं प्रोक्षणमाचरेत् ॥१९॥
परमात्मानले नाथ जाठरेनापि वन्हिना ॥ स्मरन्नैक्यं वान्हिबीजाद्यैतन्यं योजनेत्ततः ॥२०॥ ता
रेणाथाभिमंत्र्याग्निं सुधया धेनुमुद्रया ॥ अमृतीकृत्य संरक्षेदस्त्रमंत्रेण मंत्रवित् ॥२१॥ मु
द्रयात्ववगुंठिन्या वर्मणात्ववगुंठयेत् ॥ कुंडोपरिस्ततो वन्हिं त्रामयेत्रिर्ध्रुवं पठन् ॥२२॥ शय्या
गतां ऋतुस्नातां नीलेंदीवरधारिणीं ॥ देवेन भुज्यमानां तां स्मृत्वा तद्योनिमंडले ॥२३॥ ईश्वरे
॥५॥ तोधियावन्हिं स्थापयेदात्मसंमुखं ॥ मूलं नवार्णं च पठन्जानुस्पृष्टधरातलः ॥२४॥ रेफाधरैसें ॥५॥
दुसंयुक्तं गगनं वन्हिचैतनः ॥ तन्न्यायहृदयांतोयं नवार्णोग्निनिधापने ॥२५॥ विश्राण्याव
मनं देवीं देवयोर्व्वलयेद्वसुं ॥ चतुर्विंशतिवर्णेन मंत्रेणाग्नपणादिभिः ॥२६॥ चित्पिंगलहनद्वंद्वं
दहयुग्मं पचद्वयं ॥ सर्वज्ञाज्ञापय स्वाहा मंत्रश्चेदभुजाक्षरः ॥२७॥ प्रदर्श्य ज्वालिनीमुद्रां मुख्या
यविहितांजलिः ॥ श्लोकमंत्रेण रूपिणो पतिष्ठेत हुताशनं ॥२८॥ अग्निं प्रज्वालितं वंदे जातवे
दं हुताशनं ॥ सुवर्णवर्णममलं समिद्धं विश्वतो मुखं ॥२९॥ अथाग्निमंत्रं विन्यस्य तद्विधानमुदीर्यते ॥
वैश्वानरांते जातांते वेदांते स्यादिहावह ॥३०॥ लोहिताक्षपदात्सर्वकर्माण्यंते तु साधय ॥ वन्हि

ध्रियांत मंत्रोयं षट्त्रिंशत्सक्षरान्वितः ॥३१॥ ऋषिश्छंदो देवतास्य भृगुर्गायत्र पावकाः ॥ रंबी
जं गदूयं शक्तिर्वै वने विनियोजनं ॥३२॥ लिंगे पायौ मूर्ध्नि वक्त्रे सनासिनेत्रे खिलांगके ॥ वन्हेर्बी
जिह्वास्वबीजाद्यो न्यसेद्धृतानमोन्विताः ॥३३॥ हिरण्या गगना रक्ता कृष्णा सुप्रभयान्विताः ॥ ब
बहुरूपाति रक्तेति जिह्वा द्विमनसो मताः ॥३४॥ दीपिकानलवायुस्थासाद्यावर्णा विलोमतः ॥ सेंद
वः सप्तजिह्वानां सप्तानां बीजतां गताः ॥३५॥ गर्वापापित्तृगंधर्व यक्षनागपिशाचकाः ॥ राक्षसा
श्चेति जिह्वानां देवतास्तत्स्थले न्यसेत् ॥३६॥ सहस्रार्चिषे हृदयं स्वस्तिपूर्णाय मस्तकं ॥ उत्तिष्ठपुरु
षायेति शिखा मंत्रोयमीरितः ॥३७॥ धूमान्तेव्यापिने वर्म सप्तजिह्वाय नेत्रकं ॥ अस्त्रं धनुर्धराये
ति षडंगानि समाचरेत् ॥३८॥ मूर्ध्नि वामे सके पार्श्वे कटौ लिंगे कटौ पुनः ॥ दक्षे पार्श्वे सके न्यसे
न्मूर्त्तयोष्टौ विभावसोः ॥३९॥ ताराग्नये पदाद्यस्ताश्चतुर्थ्यन्त नमसान्विताः ॥ जातवेदाः सप्त
जिह्वो हव्यवाहन इत्यपि ॥४०॥ अश्वोदरजसंज्ञोन्यस्तथा वैश्वानराह्वयः ॥ कौमारतेजा विश्वा
द्विश्वमुखो वेदमुखस्तथा ॥४१॥ ततोन्यसेन्निजे देहे पीठं हाटकरेतसः ॥ वन्हिमंडलपर्यंतं मं
डूकादित उच्चरेत् ॥४२॥ पीताश्वेतारुणा कृष्णा धूम्रा तीव्रा स्फुलिंगिनी ॥ रुचिरा ज्वालिनी चे
ति कृशानोः पीठशक्तयः ॥४३॥ बीजं वह्न्यासनायेति हृदंतः पीठमंत्रकः ॥ एवं विन्यस्य पीठो
तं पावकं चिंतयेत्ततो ॥४४॥ त्रिनेत्रामारक्ततनुं सुशुक्लवस्त्रं सुवर्णस्रजमग्निमीडे ॥ वराभ
यं स्वस्तिकशक्तिहस्तं पद्मस्थमाकल्पसमूहयुक्तं ॥४५॥ एवं ध्यात्वार्चनिस्तित्वामानसंवि

मंत्र. धियद्वसोः॥ परिषिंचेत्ततस्तोयैः कुंडस्थं विमलमेव वा॥४६॥ दर्भैः परिस्तरेदग्निः प्रागग्रैरुदग
ग्रकैः॥ प्रत्यग्दक्षिणसौम्यासु न्यसेत्त्रीन्परिधीन्क्रमात्॥४७॥ पालाशान्बिल्वजांस्तेषु ब्रह्म महोदधि.
विष्णुशिवान्न्यसेत्॥ वन्हौ तस्मिन्समभ्यर्च्यावाहयेत्स्वहृदोऽनलं॥४८॥ गंधादिभिः समभ्यर्च्य पू
जयेत्सा च काद्दतीः॥ षट्सु कोणेषु मध्ये च जिह्वानां देवतां यजेत्॥४९॥ ईशानादिकवाय्वं
तकोणेषु षट्सु मुख्यरेत्॥ हिरण्याद्यानिरित्क्रांता मध्ये तु बहुरूपिणी॥५०॥ केसरेष्वंगपूजा
स्याद्दलेष्वष्टसुमूर्त्तयः॥ मातरोऽष्टौ दलांतेषु भैरवास्तु स्वदग्रतः॥५१॥ धरापुरे तु शक्राद्या
वज्राद्यायुधसंयुताः॥ एवमावरणैर्युक्तं सप्तभिः पावकं यजेत्॥५२॥ असितांगो रुरुश्चंडः
क्रोध उन्मत्तसंज्ञकः॥ कपाली भीषणश्चापि संहारश्चाष्ट भैरवाः॥५३॥ वामे कुशांस्तथास्ती
॥ ६ ॥ र्य तत्र वस्तूनि निक्षिपेत्॥ प्रणीताप्रोक्षणीपात्रे आज्यस्थालीस्रुचं स्रुवं॥५४॥ अधोमुखा ॥ ६ ॥
नि चैतानि होमद्रव्यं घृतं कुशान्॥ समिधः पंचपालाशीरन्यद्वस्तूपयोगि यत्॥५५॥ कुशा
पवित्रे मूलेन प्रोक्षेत्तानि शुभांभसा॥ उत्तानानि विधायाथ प्रणीतां पूरयेज्जलैः॥५६॥ तीर्थ
मंत्रेण तीर्थानि सरणपात आव्हयेत्सुधीः॥ पवित्रे अक्षतांस्तत्र निक्षिप्याप्लवनं चरेत्॥५७॥
अथोदीच्यां निधायैनां प्रोक्षण्यां तज्जलं क्षिपेत्॥ हवनीयं द्रव्यजालमुक्षेत्तोयैः पवित्रगैः॥५८॥
मूलेन मूलगायत्र्या यद्वा हृदयमंत्रतः॥ दक्षिणे पीठमासाद्य तत्र ब्रह्माणमाह्वयेत्॥५९॥
अणिमाद्याः सिद्धयोऽष्टौ ब्रह्मणः पीठदेवताः॥ तारहृत्पूर्वकं ङेंतो ब्रह्मा मंत्रोऽस्य पूजने॥६०॥

हस्ताभ्यां स्रुक्स्रुवौ धृत्वा तापयेत्त्रिरधोमुखौ ॥ वामहस्तेन तौ धृत्वा दर्भैर्दक्षेण मार्जयेत् ॥ ६१॥
संप्रोक्ष्य प्रोक्षणीतोयैः प्रताप्य पूर्ववस्तुनः ॥ न्यस्याग्नौ मार्जितान्दर्भांस्तथा शक्तित्रयं न्यसे
त् ॥ ६२॥ इच्छाज्ञानक्रियासंज्ञं चतुर्थ्यंतं नमसान्वितं ॥ दीर्घत्रयेंदुयुक् व्योमपूर्वकं स्थानकत्रये ॥
६३॥ हृदा स्रुचि न्यसेच्छक्तिं स्रुवे शंभुं ततस्ततो ॥ सूत्रत्रयेण संवेष्ट्य संपूज्य कुसुमादिभिः ॥
६४॥ कुशोपरि न्यसेद्दक्षे तयोः संस्कार ईरितः ॥ अस्त्रोक्षितायामाज्यस्थाल्यामाज्यं विनि
क्षिपेत् ॥ ६५॥ वीक्षणादिकसंस्कारैः संस्कृतं मूलमंत्रितं ॥ गोमुद्रयामृतीकृत्य षट् संस्कारां
स्ततश्चरेत् ॥ ६६॥ कुंडोद्धृते वायुकोणस्थितेंगारे विनिक्षिपेत् ॥ हृदेति तापनं प्रोक्तं दर्भयुग्मं प्र
दीयतं ॥ ६७॥ आज्ये क्षिप्त्वा हृदा वन्हौ पवित्रीकरणं क्षिपेत् ॥ आज्यं नीराजयेद्दीप्तदर्भयुग्मे
न वर्मणा ॥ ६८॥ अभिद्योतनमुक्तं तद्दीप्तं दर्भत्रयं धृते ॥ दर्शयेदस्त्रेणोद्द्योतो गृहीत्वा घृतपा
त्रिकां ॥ ६९॥ संयोज्याग्नौ तदंगारान्सलिलं संस्पृशेत्सुधीः ॥ अंगुष्ठानामिकाभ्यां तु दर्भावादाय
निक्षिपेत् ॥ ७०॥ निरग्नि संमुखं त्वाज्यमस्त्रेणोत्सवनं विदं ॥ हृदा तत्संमुखं तद्वदाज्यक्षेपस्तु
संप्लवः ॥ ७१॥ नीराजनादिसंस्कारेष्वग्नौ दर्भान्विनिक्षिपेत् ॥ दर्भद्वयं ग्रंथियुतं घृतमध्ये विनि
क्षिपेत् ॥ ७२॥ वामदक्षिणयोः पक्षौ स्मृत्वा नाडीत्रयं स्मरेत् ॥ दक्षिणाद्वामतो मध्याद्धृदादाय घृतं
सुधीः ॥ ७३॥ अग्नयेऽग्निप्रियासोमाय स्वाहेत्यग्निनेत्रयोः ॥ जुहुयादग्निसोमाभ्यां स्वाहेत्य

क्षिप्त्वा तृतीयके ॥७४॥ पातयेदाहुतीः शेषमाहुतीग्रहपात्रके ॥ भूयो हृदा दक्षभागादादा
याज्यं मुखे यजेत् ॥७५॥ अग्नये स्विष्टकृते तन्नेत्रस्योद्घाटनं मतं ॥ नरसिंहं विना विष्णु
मंत्रेण नेत्रद्वयं यजेत् ॥७६॥ नरसिंहे न्यदेवेषु वन्हेर्नेत्रत्रयं स्मृतं ॥ महाव्याहृतिभिर्व्यस्तैः स
मस्ताभिश्चतुष्टयं ॥७७॥ आहुतीनां त्रयं वन्हिमंत्रेण च ततश्चरेत् ॥ घृताहुतिभिरष्टाभि
रेकैकां संस्कृतिं चरेत् ॥७८॥ ॐ मस्याग्नेरमुसंस्कारं करोम्यग्निवल्लभा ॥ इच्छं मनुं जपेद्ग
र्भाधानं पुंसवनं ततः ॥७९॥ सीमंतोन्नयनं जातकर्म कृत्वा ततश्चरेत् ॥ वन्हौ पंचसमिद्धोमा
न्नालापनयनं वसोः ॥८०॥ कुर्याद्द्वियाभिधानेन पूर्ववन्नामशुभं ततः ॥ नामानंतरमेतस्य पित
रौ स्वपयेद्बुधः ॥८१॥ अन्नप्राशनं तथा चौलोपनयो दारनियोजनं ॥ संस्कारास्तु विधया होतात्र ह्न्यं
ताः क्रूरकर्मणि ॥८२॥ एकैकामाहुतिं कुर्याद्वन्हेर्जिह्वां गमूर्तिभिः ॥ इंद्रादिभिश्च वज्राद्यैर्द्वितीं
तैर्जुहुयात्ततः ॥८३॥ स्रुवेणाज्यं चतुर्वारं निधाय स्रुचि तां सुधीः ॥ अपिधाय स्रुवेणैतां गृही
त्वा करयुग्मतः ॥८४॥ तिष्ठन् मूलं तयोनभिश्च त्वाग्रे निक्षिपेत्क्रमं ॥ वा मस्तनांतं तन्मूलं कृ
त्वाग्निमनुना सुधीः ॥८५॥ जुहुयाद्वौषडंतेन संपत्यर्थमतंद्रितः ॥ महागणेशमंत्रेणाथ्यस्ते
न दशधा ततः ॥८६॥ जुहुयाच्च समस्तेन चतुर्वारं घृताहुतीः ॥ पूर्वपूर्वयुता बीजषट्कं बाणा
श्च सायकाः ॥८७॥ पुनर्योमार्णमाग्नेति विभागस्तन्मनोः स्मृतः ॥ तालो लक्ष्मीगिरिसुता का
मो भूर्गणनायकः ॥८८॥ चतुर्थ्यंतो गणपतिर्वरांते वरदेति च ॥ सर्वांते जनमित्युक्त्वा मेव

शांतेतिमानया॥८९॥स्वाहांतोवसुयुग्मार्णोमहागणपतेर्मनुः॥एवंकृत्वाग्निसंस्कारंपीठंदे
वस्यपूजयेत्॥९०॥तत्रेष्टदेवमावाह्य मुद्राश्चाधारुनादिकाः॥प्रदर्श्यवन्हिरूपस्यदेवस्यव
दनेपुनः॥९१॥मूलेनजुहुयात्पंचविंशत्संख्याघृताहुतीः॥वन्हेकीकरणंचाग्निदेवयोस्तेन
जायते॥९२॥ नाडीसंधानसिध्यर्थंवन्हिदेवतयोस्ततः॥जुहुयान्मूलमंत्रेणरुद्रसंख्याघृता
हुतीः॥९३॥इष्टदेवस्याहुतीनामेकैकामाहुतिंचरेत्॥ततस्तुमूलमंत्रेणदशधाजुहुया
घृतं॥९४॥ततःकल्पोक्तद्रव्येणदशांशंजुहुयात्ततः॥होमंसमाप्यकुर्वीतस्पर्शाहुतिमन
न्यधीः॥९५॥होमावशिष्टेनाज्येनपूरयित्वास्रुवंसुधीः॥पुष्पंफलंविधायाग्रेस्रुवेणाच्छादितां
पुनः॥९६॥उत्थितोवौषडंतेनमूलेनजुहुयाद्वसौ॥तद्द्रव्येणाहुतीनांचजुहुयादाहुतिंघृतैः॥
९७॥देवंविसृज्यस्वहृदिवन्हेर्जिह्वांगमूर्त्तिभिः॥जुहुयाद्व्याहृतीर्हुत्वाप्रोक्षेत्तंप्रोक्षणीज
लैः॥९८॥संप्रार्थ्यानेनमनुनानत्वातंविसर्जयेद्धृदि॥भोभोवन्हेमहाशक्तेसर्वकर्मप्रसादक॥
९९॥कर्मांतरेपिसंप्राप्तेसान्निध्यंकुरुसादरं॥वन्हौपवित्रंनिक्षिप्यप्रणीतांबुभुविक्षिपेत्॥१००॥
विधिंविसृज्यसकुशान्परिधीन्विसर्जयेद्वसौ॥एवंहोमंसमाप्याथतर्पयेद्देवतांजलैः॥१०१॥
आवाह्यतद्दशांशेनतर्पणादभिषेचनं॥तर्पयामिनमस्त्वेतिद्वितीयांतेष्टपूर्वकं॥१॥मूलांतेसुप
दंदेवंसिंचामीत्यभिषेचने॥ततोनानाविधैरन्नैस्तर्पयेद्द्विजसत्तमान्॥१०३॥इष्टरूपान्समा

मंत्र० राध्यते भ्योदद्याच्च दक्षिणां ॥ न्यूनं संपूर्णतामेति ब्राह्मणाराधनान्नृणां ॥ ४ ॥ देवताश्च प्रसीदंति महो०
संपद्यंते मनोरथाः ॥ २०५ ॥ ७३ ॥ इति श्रीमन्महीधरविरचिते मंत्रमहोदधौ भूतशुद्ध्यादिकथनंना
मप्रथमस्तरंगः ॥ १ ॥ ७३ ॥ ७ ॥ गणेशस्य मनून्वक्ष्ये सर्वाभीष्टप्रदायकान् ॥ जलं चक्री वह्नि
युतः कर्णेंद्वाढ्या च कामिका ॥ १ ॥ दारको दीर्घसंयुक्तो वायुः कवचपश्चिमः ॥ षडक्षरो मंत्रराजो
ओ भवतामिष्टसिद्धिदः ॥ २ ॥ भार्गवो मुनिरस्योक्तश्छंदोनुष्टुबुदाहृतं ॥ विघ्नेशो देवता बीजं
वं शक्तिर्यमितीरितं ॥ ३ ॥ षडक्षरैः सविंदुभिः प्रणवाद्यैर्नमोंतकैः ॥ प्रकुर्याज्जातिसंयुक्तैः षडं
गविधिमुत्तमं ॥ ४ ॥ भ्रूमध्यकंठहृदयनाभिलिंगपदेषु च ॥ मनोर्वर्णान्क्रमान्न्यस्य ध्याप
य्याथो स्मरेत्प्रभुं ॥ ५ ॥ उद्यद्दिनेश्वररुचिं निजहस्तपद्मैः पाशांकुशाभयवरान्दधतं गजास्यं ॥
॥ ८ ॥ रक्तांबरं सकलदुःखहरं गणेशं ध्यायेत्प्रसन्नमखिलाभरणाभिरामं ॥ ६ ॥ ऋतुलक्षं जपेन्मं ॥ ८ ॥
त्रं मधुरद्रव्यैर्दशांशतः ॥ जुहुयान्मंत्रसंसिद्ध्यै याउयान्भोजयेच्छुचीन् ॥ ७ ॥ इक्षवः सक्तवो रंभा
फलानि चिपिटास्तिलाः ॥ मोदका नारिकेलानि लाजा द्रव्याष्टकं स्मृतं ॥ ८ ॥ पीठमाधारशक्त्या
दिपरतत्वांतमर्चयेत् ॥ तत्राष्टदिक्षु मध्ये च संपूज्या नवशक्तयः ॥ ९ ॥ तीव्रा च ज्वालिनी नंदा भोग
दा कामरूपिणी ॥ उग्रा तेजोवती सत्या नवमी विघ्ननाशिनी ॥ १० ॥ विनायकस्य मंत्राणामेता
स्युः पीठशक्तयः ॥ सर्वशक्तिकमांतत्तु लासनाय हृदंतिकः ॥ ११ ॥ पीठमंत्रस्तदीयेन बीजेनादौ
समन्वितः ॥ प्रदायासनमेतेन मूर्तिं मूलेन कल्पयेत् ॥ १२ ॥ तस्यां गणेशमावाह्य पूजयेदा

सनादिभिः ॥ अभ्यर्च्य कुसुमैरीशं कुर्यादावरणार्चनं ॥ १३ ॥ आग्नेयादिषु कोणेषु हृद
यं च शिरः शिखां ॥ वर्माभ्यर्च्याग्रतो नेत्रं दिक्ष्वस्त्रं पूजयेत्सुधीः ॥ १४ ॥ द्वितीयावरणे पूज्याः
आमाद्यष्टौ च शक्तयः ॥ विद्यादिमा विधात्री च भोगदा विघ्नघातिनी ॥ १५ ॥ निधिप्रदीपा पाप
घ्नी पुण्या पश्चाच्छशिप्रभा ॥ दलाग्रेषु वक्रतुंड एकदंष्ट्रो महोदरः ॥ १६ ॥ गजास्यलंबोद
रः कोपि विकटो विघ्नराजकः ॥ धूम्रवर्णस्तदग्रेषु शक्राद्या आयुधैर्युताः ॥ १७ ॥ एवमावरणैः
पूज्यः पंचभिर्गणनायकः ॥ पूर्वोक्तावपुरश्चर्या कार्या मंत्रस्य सिद्धये ॥ १८ ॥ ततः सिद्धो म
नौ काम्यान्प्रयोगान्साधयेत्त्रिजान् ॥ ब्रह्मचर्ययुतो मंत्री जपेद्विसहस्रकं ॥ १९ ॥ षण्मासम
ध्याद्दारिद्र्यं नाशयेत्स्येयनिश्चितं ॥ चतुर्थ्यादि चतुर्थ्यंतं जपेद्दशसहस्रकं ॥ २० ॥ प्रत्यहं जु
हुयादष्टोत्तरं शतमतंद्रितः ॥ पूर्वोक्तफलमाप्नोति षण्मासाद्भक्तितत्परः ॥ २१ ॥ आज्या
क्तान्नस्य होमेन भवेदन्नसमृद्धिमान् ॥ पृथुकैर्नारिकेरैर्वा मरीचैर्वा सहस्रकं ॥ २२ ॥ प्रत्य
हं जुहुतो मासाज्जायते धनसंचयः ॥ क्षीरसिंधुमरीचाक्तैरष्टद्रव्यैः सहस्रकं ॥ २३ ॥ जुह्व
न्प्रतिदिनं पक्षात्स्यात्कुबेर इवार्थवान् ॥ चतुःशतं चतुश्चत्वारिंशदाढ्यं दिनं प्रति ॥ २४ ॥
तर्पयेन्मूलमंत्रेण मंत्री लोदिष्टमाप्नुयात् ॥ अथ मंत्रांतरं वक्ष्ये साधकानां निधिप्रदं ॥ २५ ॥
रायस्पोषस्य गुर्वाद्यो गदिता मेषसात्वतो ॥ सदृशो दोरत्नधातुमान् रक्षोगणर्नरतिः ॥ २६ ॥

ससद्योबलशाङ्र्खंनोषड्स्वरसंयुतः ॥ एकत्रिंशद्वर्णयुक्तोमंत्रोभीष्टप्रदायकः ॥ १७ ॥
सायकैस्त्रिभिरष्टाभिश्चतुर्भिः पंचभीरसैः ॥ मंत्रोत्थितैः क्रमाद्वर्णैः षडंगंसमुदीरितं ॥
१८ ॥ ऋष्याद्यन्योप्रयोगास्युः पूर्ववन्निधिदोह्वयं ॥ पद्मनाभयुतोभानुर्मेधासद्यसमन्वि
ता ॥ १९ ॥ लकारवंनंतमारूढोवायुः पावकगैहिनी ॥ षडक्षरोयमादिष्टोभजतामिष्टदोम
नुः ॥ २० ॥ पूर्ववत्सर्वमेतस्यसमाराधनमीरितं ॥ लकुलीदशमारूढोभृगुतोलोहितः
सदृक् ॥ २१ ॥ बकः सदीर्घश्चसाक्षीलिखेमंत्रः शिरोंतकः ॥ नवाक्षरोमुनिश्चास्यकंकोलः
परिकीर्त्तितः ॥ २२ ॥ विराट्छंदोदेवतातुस्यादुच्छिष्टश्चविनायकः ॥ द्वाभ्यांत्रिभिर्द्वयेनाथद्वा
भ्यांसकलमंत्रतः ॥ २३ ॥ पंचांगान्यस्यकुर्वीतध्यायेत्तंशशिशेखरं ॥ चतुर्भुजंरक्ततनुंत्रि
नेत्रंपाशांकुशौमोदकपात्रदंतौ ॥ करैर्दधानंसरसीरुहस्थमुन्मत्तमुच्छिष्टगणेशमीडे ॥
२४ ॥ लक्षमेकंजपेन्मंत्रंदशांशंजुहुयात्तिलैः ॥ पूर्वोक्तेपूजयेत्पीठेविधिनोच्छिष्टविघ्नपं ॥
॥ २५ ॥ आदावंगानिसंपूज्यब्राह्म्याद्यादिक्षुपूजयेत् ॥ कंकुसुवक्रतुंडाद्यान्दशासुप्रीतपूजयेत् ॥
२६ ॥ वक्रतुंडैकदंष्ट्रौचतथालंबोदराभिधः ॥ विकटोधूम्रवर्णश्चविघ्नश्चापिगजाननः ॥
२७ ॥ विनायकोगणपतिर्हस्तिदंताभिधोंतिमः ॥ इंद्राद्यानपिवज्राद्यान्पूजयेदाष्टतिद्व

ये ॥३९॥ एवं सिद्धमनो मंत्री प्रयोगान्कर्तुमर्हति ॥ स्वांगुष्ठप्रतिमां कृत्वा कपिनासित भा
नुना ॥३९॥ गणेशप्रतिमां रम्यामुक्तलक्षणलक्षितां ॥ प्रतिष्ठाप्य विधानेन मधुना स्नापयेत्तु
तां ॥४०॥ आरभ्य कृष्णसंभूतादियावच्छुक्लचतुर्दशी ॥ सगुडं पायसं तस्मै निवेद्य प्रजपेन्मनुं ॥
४१॥ सहस्रं प्रत्यहं तावत्जुहुयात्सघृतैस्तिलैः ॥ गणेशोहमिति ध्यायन्नुच्छिष्टेनावृतार
हः ॥४२॥ पक्षाद्राज्यमवाप्नोति नृपजोन्योपि धानरः ॥ कुलालमृत्स्ना प्रतिमा पूजितैर्वसु
राज्यदा ॥४३॥ वल्मीकमृत्कृता लाभमेवमिष्टान्प्रयच्छति ॥ गौरी सौभाग्यदा सैवं लावणी
क्षोभयेदरीन् ॥४४॥ निंबजा नाशयेच्छत्रून्प्रतिमैवं समर्चिता ॥ मध्वक्तै होमितो लाजैर्वश
येदखिलं जगत् ॥४५॥ सुप्ताधिशय्यमुच्छिष्टो जपन्शत्रून्वशं नयेत् ॥ कटुतैलान्वितै रा
जीपुष्पैर्विद्वेषयेदरीन् ॥४६॥ द्युते विवादे समरे जप्तोयं जयमावहेत् ॥ कुबेरस्य मनोर्जा
पान्निधीनां स्वामितामियात् ॥४७॥ लेभाते राज्यमनरिं वा नरेशविभीषणौ ॥ रक्तव
स्त्रां गरागाढ्यस्तांबूलं निश्यदन्जपेत् ॥४८॥ यद्वा निवेदितं तस्मै मोदकं भक्षयेज्जपन् ॥
पिशितं वा फलं वापि तेन तेन बलिं हरेत् ॥४९॥ सिंदुः स्मृतिस्तथा कारी मन्विंद्वाढ्यो वसुष्टिलौ ॥
पंचांतकशिवौ तद्वदुच्छिष्टगणमान्वितः ॥५०॥ उमाकांतः शायमांते हायक्षायस बिंदुयः ॥
बलिरित्येष कथितो नयेंदूणोबिलेर्मनुः ॥५१॥ ताराद्यश्च गणेशाद्योनवार्णो दशवर्णकः ॥

प्रोक्तो द्वयोपासनं तु प्रोक्तमस्य नवार्णवत् ॥५२॥ ध्रूं श्रमायासेंदुः शाङ्र्ङ्गीबीजाद्यो नवपंक्तिः॥
द्वादशार्णो मनुः प्रोक्तः सर्वमस्य नवार्णवत् ॥५३॥ ध्रूं वोह्दुच्छिष्टगणेशायांते तु नवाक्षरः॥
एकोनविंशत्यर्णाढ्यो मनुर्मुन्यादि पूर्ववत् ॥५४॥ त्रिभिः सप्तभिरक्षिभ्यां त्रिभिर्द्वाभ्यां द्वयेन
च॥ मंत्रोच्छितैः सुधीर्वर्णैः कुर्यादंगं पुरा वर्नं ॥५५॥ तारो नमो भगवते क्लिंटीशाश्रतुरा
ननः॥ द्रंष्ट्राय सुहस्तिमुखार्य खाय लंबोदराय सचा ॥५६॥ उच्छिष्टमविय द्दीर्घात्मने पाशांकु
शः परा॥ सेंदुः शाङ्र्ङ्गी भगधुले ह्मेमघे वह्निकामिनी ॥५७॥ उच्छिष्टगणनाथस्य मनुरद्रिगु
णाक्षरः॥२॥७॥३७॥ गणको मुनिराख्यातो गायत्री छंद ईरितं ॥५८॥ उच्छिष्टगणपो देवो जप
॥१०॥ दुच्छिष्ट एव तं॥ सप्त७ दिक्१० बाण५ सप्त७ ब्धि४ युगा४ वैरिंगकं मनोः॥५९॥ शरांधनुःपा
शसृणी स्वहस्तैर्दधानमारक्तसरोरुहस्थं॥ विवस्त्रपत्न्यां सुरतप्रवृत्तमुच्छिष्टमंबासुतमा
श्रयेयं॥६०॥ लक्षं जपेत् घृतैर्हुत्वा तद्दशांशं प्रपूजयेत्॥ पूर्वोक्तपीठे स्वाभीष्टसिद्धये पूर्ववि
द्विभुं॥६१॥ कृष्णाष्टम्यादितत्कृतं यावत्तावज्जपेन्मनुं॥ प्रत्यहं साष्टसाहस्रं जुहुयात्तद
शांशतः॥६२॥ तर्पयदपि मंत्रायं सिद्धिएवं प्रयच्छति॥ धनधान्यं सुतान्पौत्रान् सौभाग्यम
तुलयशः॥६३॥ मूर्त्तिं कुर्यात्कृष्णाशस्य शुभाहे निंबदारुणा॥ प्राणप्रतिष्ठां कृत्वाथ तदग्रे
मंत्रमाजपेत्॥६४॥ ये ध्यात्वादासवत्सोपि च वश्यो भवति निश्चितं॥ नदीजलं समादाय स

तविंशतिसंख्यया॥६५॥मंत्रइत्वामुखंतेनत्रक्षाल्येन्मासमांविकोलत्॥पश्येद्यंदश्पतेयेनसव
शोभायतेक्षणात्॥६६॥चतुःसहस्रंधत्तूरपुष्पाणिमंत्तुनार्पयेत्॥गणेशायनृपादीनांजनानां
वश्यचाहकले॥६७॥सुंदरीवामपादस्यरेणुमादायतत्रतु॥संस्कोगणनाथस्यप्रतिमांपूजय
न्मनुं॥६८॥तांध्यात्वारविसाहस्रंसासमायातिदूरतः॥श्वेतार्केणाथनिंबेनकृत्वामूर्त्तिंघृता
सुकां॥६९॥चतुर्थ्यांपूजयद्रात्रौरक्तैःकुसुमचंदनैः॥जपासहस्रंतांमूर्त्तिंक्षिपेदग्नौस
रित्तटे॥७०॥स्वेष्टकार्यसमावृष्टेस्वप्नेतस्यगणाधिपः॥सहस्रंनिंबकाष्ठानांहोमादुच्चाटये
दरीन्॥७१॥वज्रिणःसमिधांहोमाद्रिपुर्यमपुरंव्रजेत्॥योनरस्यास्थिसंजप्तांक्षिप्रमुच्चाटये
न्गृहे॥७२॥जप्तांनरास्थिकन्यायागृहेक्षिप्तंतदासिद्धत्॥कुलालस्यमृदास्त्रीयांवामपाद
स्यरेणुना॥७३॥लेखापुत्तलिकांतस्याहृदिस्त्रीनामसंलिखेत्॥निखनेन्मंत्रसंजप्तेनिंबिका
ष्ठैःक्षिताविमां॥७४॥सोन्मत्ताभवतिक्षिप्रमुद्धतायांसुखंभवेत्॥शत्रोरेवंकृतासातुलघु
नेनसमन्विता॥७५॥शरावांतर्गतासम्यक्पूजिताद्वारिविद्विषः॥निखातापक्षमात्रेणशत्रूच्चाट
नस्स्मृता॥७६॥विषमेसमनुप्राप्तेसिताकारिष्टदारुजं॥गणपंपूजितंसम्यक्कुसुमैःरक्तचं
दनैः॥७७॥मद्यभांडस्थितंहस्तमात्रंतंनिखनेत्स्थले॥तत्रोपविश्यप्रजपेन्मंत्रीनक्तंदिवंमनुं॥
७८॥सप्ताहमध्येनश्यंतिसर्वेघोराउपद्रवाः॥शत्रवोवश्यतांयांतिवर्द्धंतेधनसंपदः॥७९॥

ऽष्ट स्त्रीयाम पादस्यरजसानिजदेह जे ॥ मद्ये मूत्रपुरीषाद्यैः कुंभकार मृदापि वा ॥८०॥ एतैः
कृत्वा गणेशस्य प्रतिमां मध्यभांडमां ॥ संपूज्य निस्वनेङ्गूमौ हस्तार्द्धपूरिते पुनः ॥८१॥ संस्थाप्य
वन्हिं जुहुयात्कुसुमैर्हयमारजे ॥ साहस्त्रं सा भवेद्दासी तत्न्वाय मनसाधने ॥८२॥ एवमाद्रिप्रयो
गांस्तु नवार्थे नापि साधयेत् ॥ तारो हस्तिमुखायाथ ङें तो लंबोदरस्तथा ॥८३॥ उच्छिष्टांते महात्मा
ङेमाशांकु शाशि वात्मभूः ॥ मायावर्म च घे घे उच्छिष्टाय दहनांगना ॥८४॥ द्वात्रिंशदक्षरो मंत्रो यजनं
पूर्ववन्मतं ॥ रसे ६ षु ५ सप्त ७ षट् ६ ष ६ द्व ६ ने त्रापैरिंगमीरितं ॥८५॥ उच्छिष्ट गजवक्त्रस्य मंत्रे षेषु
न शोधनं ॥ सिद्धादि चक्र मासादेः श्राप्तास्तु सिद्धिदा गुरोः ॥८६॥ मनवो मी सदा गोप्या न प्रकाश्याय
तः कुतः ॥ परिक्षिताय शिष्याय देया वा निजसूनवे ॥८७॥ माया त्रिमूर्त्ति चंद्रस्थोपं वांत कंडु
ताशनौ ॥ तारादि शक्ति बीजांतो मंत्रो यं चतुरक्षरः ॥८८॥ भार्गवोस्य मुनिश्छंदो विराट् शक्ति
गणाधिपः ॥ देवो माया द्वितीयेनु शक्ति बीजं प्रकीर्त्तितः ॥८९॥ षट् दीर्घयुक् द्वितीयेन तारोद्येन
षडंगकं ॥ विधाय साधकेंद्रेण मनसा संस्मरेत्प्रभुं ॥९०॥ बीपांकुशा वक्षसूत्रं च पाशं दधानं करे
र्मोदकं पुष्करेण ॥ स्वपत्न्या युतं हेमभूषाभराढ्यं गणेशं समुद्यद्दिनेशाभमीडे ॥९१॥ एवं ध्यात्वाज
पेल्लक्षं चतुष्कं तद्दशांशतः ॥ मधूपैर्जुहुयाद्वन्हौ मध्वक्तैस्तर्पयेच्च तं ॥९२॥ पूर्वोक्ते पूजयेत्पीठे केसरे
ष्वंगदेवताः ॥ दलेषु वक्रतुंडाद्यान् आलीस्याद्याद्दलाग्रगाः ॥९३॥ ककुप्पालांस्तदग्राणि सि

द्र एव भवेन्मनुः॥ घृताक्तमन्नं जुहुयादा वर्षादन्नवान् भवेत्॥ १४॥ पायसान्नैर्हुता लक्ष्मीरिक्षुखंडै
र्नृपश्रियः॥ रंभाफलैर्नारिकेरैः इक्षुकैर्वश्यता भवेत्॥ १५॥ घृतेन धनमाप्नोति लवणैर्मधुसंयुतैः॥
वामनेत्रां वशीकुर्याद्यूपैः पृथिवीपतिं॥ १६॥ तारो रमा चंद्रयुक्तः खांतः सौम्यासमीरणः॥ ङेंतो गण
पतिस्तोयं रवरांते द्र सर्ववां॥ जनं मे वशमा दीर्घा वायुः पावकगेहिनी॥ अष्टाविंशतिवर्णोयं मनुर्द्धन
समृद्धिदः॥ १८॥ अंतर्यामिमुनिश्छंदो गायत्री देवता मनोः॥ लक्ष्मीविनायको बीजं रमा शक्तिर्वसु
प्रिया॥ १९॥ रमा गणेशबीजाभ्यां दीर्घाढ्याभ्यां षडंगकं॥ दंताभये चक्रदरौ दधानं कराग्रगस्वर्ण
घटं त्रिनेत्रं॥ धृताब्जया लिंगितमब्धिपुत्र्या लक्ष्मीगणेशं कनकाभमीडे॥ २०॥ चतुर्लक्षं जपेन्मंत्रं
समिद्भिर्बिल्वशाखिनः॥ दशांशं जुहुयात्पीठे पूर्वोक्ते तं प्रपूजयेत्॥ १॥ आदावंगानि संपूज्य शक्तिर
ष्टाविमा यजेत्॥ बलाकी विमला ख्याता कमला वसुमालिका॥ २॥ बिभीषिका मालिका च शांकरी
वनमालिका॥ पद्मशंखनिधी पूज्यौ पार्श्वयोर्दक्षवामयोः॥ ३॥ लोकाधिपास्तदग्राणि तद्बहिः
परिपूजयेत्॥ एवं सिद्धमनो मंत्री प्रयोगान्कर्तुमर्हति॥ ४॥ उरोमात्रे जले मंत्री स्थित्वा ध्यात्वार्कमं
डले॥ देवं त्रिलक्षं जपतो धनवृद्धिः प्रजायते॥ ५॥ बिल्वमूलं समाश्रित्य तावज्जप्ते फलं हि तत्॥ अ
शोककाष्ठैर्ज्वलिते वन्हावाज्याक्ततंदुलैः॥ ६॥ होमतो वशयेद्विश्वं कर्मकाष्ठे शुवावपि॥ खादिरा
ग्नौ नरपतिं लक्ष्मीपायसहोमतः॥ ७॥ वक्रकर्पेंदु पुपूर्णां तोडैकदंष्ट्राय मन्मथः॥ मायारमाग

मं॰त्र॰ जमुखो गणपांते भगीहरिः॥८॥ वरमालाग्निसत्याः सरेफा रुद्रं जलिं स्थिरा॥ सेंदुर्मेषो मेवशां महोदधि॰
ते मानयोषर्बुधप्रिया॥९॥ स्यात्त्रयस्त्रिंशदर्णाढ्यो मुनिस्त्रैलोक्यमोहनः॥ गणकोस्य ऋषिश्छंदो
गायत्री देवता पुनः॥१०॥ त्रैलोक्यमोहनकरो गणेशो भक्तसिद्धिदः॥ रविवेदशरोदन्वद्रसनेत्रैः
षडंगकं॥११॥ गदाबीजपूरे धनुःशूलचक्रे सरोजोत्पले पाशधान्याग्रदंतान्॥ करैः संदधानं
स्वशुंडाग्रराजन्मणीकुंभमंकाधिरूढं सपत्न्यान्॥१२॥ सरोजन्मना भूषणानां भरेणोज्वलद्धस्त
तन्व्या समालिंगितांगं॥ करीन्द्राननं चंद्रचूडं त्रिनेत्रं जगन्मोहनं रक्तकांतिं भजे त्वां॥१३॥ अंगा
॥१२॥ र्चा पूर्ववत्प्रोक्ता शक्तीः पत्रेषु पूजयेत्॥ वामा ज्येष्ठा च रौद्री स्यात्काली कलपदादिका॥१४॥ विक ॥१२॥
रण्याह्वया तद्वद्बलाद्या प्रमथन्यपि॥ सर्वभूतदमन्याख्या मनोन्मन्यपि चाग्रतः॥१५॥ दिक्षुपत्र
मोदः सुमुखो दुर्मुखो विघ्ननायकः॥ दीर्घाद्या मातरः पूज्या इंद्राद्या आयुधान्यपि॥१६॥ एवं सि
द्धे मनौ कुर्यात्त्रियोगानिष्ठसिद्धये॥ वशायै कमलैर्भूपान्मंत्रिणः कुमुदैर्हुतैः॥१७॥ समिद्भिरश्वल
दलसमुद्भूतैर्धरासुरान्॥ उदुंबरोत्थैर्नृपतीन् प्लक्षैर्वटैर्विशोंस्तिमान्॥१८॥ क्षौद्रेणाकन
कन्याप्तिर्गोप्राप्तिः पयसा गवां॥ वृद्धिर्दध्योदनैरन्नं घृतैः श्रीर्वृतसैर्जलैः॥१९॥ तारो नम गणेशा
भूहरिद्रागणेशोहितः॥ आषाढीयेयरे वरसत्यसर्वजनं तर्जनी॥२०॥ हृदयस्तंभ पद्वंद्वं वक्त्रस्व
भास्वर्णरेतसः॥ द्वात्रिंशदक्षरो मंत्रो मदनो मुनिरीरितः॥२१॥ छंदोनुष्टुप् देवता तु हरिद्राग
णनायकः॥ वेदा४ष्ट८ शर६ सप्ता७ग६ नेत्रा२ [illegible]रिं गमीरितं॥२२॥ पाशांकुशौ मोदक

मेकदंतं करैर्दधानं कनकासनस्थं ॥ हरिद्रखंडप्रतिमं त्रिनेत्रं पीतांशुकं रात्रिगणेशमीडे ॥
२३ ॥ वेदलक्षं जपित्वांते हरिद्राचूर्णमिश्रितैः ॥ दशांशं तंडुलैर्हुत्वा ब्राह्मणानपि भोजयेत् ॥
२४ ॥ पूर्वोक्तपीठे प्रयजेदंगमातृदिगाधिपैः ॥ एवमाराधितो मंत्रः सिद्धो यच्छेन्मनोरथान् ॥ २५ ॥
शुक्लपक्षे चतुर्थ्यां तु कन्यापिष्टहरिद्रया ॥ विलिप्यांगं जले स्नात्वा पूजयेद्गणनायकं ॥ २६ ॥
तर्पयित्वा पुरस्तस्य सहस्रं साग्रकं जपेत् ॥ शतं हुत्वा साज्यपूपैर्भोजयेद्ब्रह्मचारिणः ॥ २७ ॥
कुमारीरपि संतोष्य गुरुं प्राप्नोति वांछितं ॥ लाजैः कन्या मवाप्नोति कन्यापि लभते वरं ॥
२८ ॥ वंध्या नारी रजःस्नाता पूजयित्वा गणाधिपं ॥ पलप्रमाणगोमूत्रपिष्टैः सिंधुवचानिशा ॥
२९ ॥ सहस्रं मंत्रयेत्कन्याबद्धान्संपूज्य मोदकैः ॥ पीत्वा तदौषधं पुत्रं लभते गुणसागरं ॥ ३० ॥
वाणीस्तंभं रिपुस्तंभं कुर्यान्मुनिरुपासितः ॥ जलाग्निचौरसिंहास्त्रप्रमुखानपि रोधयेत् ॥
३१ ॥ शार्ङ्गी मांसस्थितः सेंदुर्बीजमुक्तं गणेशितुः ॥ हरिद्राख्यस्य यजनं पूर्ववत्प्रोदितं म
नोः ॥ ३२ ॥ प्रोक्ता एते गणेशस्य मंत्रा इष्टमभीप्सिता ॥ गोपनीया न दुष्टेभ्यो प्रदेनीयाः कदाच
ना ॥ ३३ ॥ ७ ॥ इति श्रीमहीधरविरचिते मंत्रमहोदधौ गणेशमंत्रकथनं नाम द्वितीयस्तरं
गः ॥ २ ॥ ७ ॥ ७ ॥ अथ कालीमनून्वक्ष्ये सद्यो वाक्सिद्धिदायकान् ॥ आराधितैर्यैः सर्वेष्टंप्रा
प्नुवंति जना भुवि ॥ १ ॥ क्रोधीशत्रितयं वन्हिवामाक्षिविधुभिर्युतं ॥ वराहद्वितयं वामकर्णवं

दसमन्वितं ॥२॥ मायायुग्मं दक्षिणे च दीर्घा स्पृष्टिः सदृक्क्रिया ॥ चक्रीक्रींटी रामारूढ त्रा
गुक्तं बीजसप्तकं ॥३॥ मंत्रो वह्निप्रियांतोयं द्वाविंशत्यक्षरो मतः ॥ न चात्र सिद्धसिद्ध्यादि
शोधनं मनसापि वा ॥४॥ न यत्नो नियमः कश्चित्पुरश्चर्यनिमित्तकः ॥ विद्याराज्ञी स्मृतेरेव
सिध्यष्टकमवाप्नुयात् ॥५॥ भैरवोस्य ऋषिश्छंदो उष्णिक् कालीतु देवता ॥ बीजं मायादीर्घव
र्मशक्तिरुक्ता मनीषिभिः ॥६॥ षट्दीर्घाढ्याद्यबीजेन विद्ययाऽङ्गमीरितं ॥ मातृकापंच
धाभक्ता वर्णान्दशाष्टशः क्रमात् ॥७॥ हृदये भुजयोः पादद्वये मंत्री प्रविन्यसेत् ॥ व्योपकं म
नुनाकृत्वाध्यायेच्चेतसि कालिकां ॥८॥ सद्यश्छिन्नशिरः कृपाणमभयं हस्तैर्वरं बिभ्रती घो
रास्यां शिरसां स्रजासुरुचिरामुन्मुक्तकेशावलीं ॥ सृक्कासृक्प्रवहां स्मशाननिलयां श्रुत्योः
शवालंकृतीं श्यामांगीं कृतमेखलां शवकरैर्देवीं भजे कालिकां ॥९॥ एवं ध्यात्वा जपेल्लक्षं जु
हुयात्तद्दशांशतः ॥ प्रसूनैः करवीरोत्थैः पूजायंत्रमथोच्यते ॥१०॥ आदौ षट्कोणमास्य
त्रिकोणत्रितयं ततः ॥ पद्ममष्टदलं बाह्ये भूपुरं तत्र पूजयेत् ॥११॥ जयाख्या विज [illegible] यापश्चा
दजिता चापराजिता ॥ नित्या विलासिनी चापि दोग्ध्री घोरा च मंगला ॥१२॥ पीठशक्तय ए
तास्युः कालिकायोगपीठतः ॥ आत्मने हृदयांतोयं मायादिः पीठमंत्रकः ॥१३॥ अस्मिन्पीठे
पूजेद्देवीं शिवरूपशवस्थितां ॥ महाकालरतासक्तां शिवाभिर्दिक्षु वेष्टितां ॥१४॥ अंगानि पू
र्वमाराध्य षट्पत्रेषु समर्चयेत् ॥ कालीं कपालिनीं कुल्लां कुरुकुल्लां विरोधिनीं ॥१५॥ विप्रचित्तां
च संपूज्य नवकोणेषु पूजयेत् ॥ उग्रामुग्रप्रभां दीप्तां नीलां घनां बलाकिकां ॥१६॥ मात्रां मुद्रां

तथामित्रोऽप्यपत्रेषु मातरः॥ पश्चस्याश्च सुयत्नेन ब्राह्मी नारायणीत्यपि॥१७॥ माहेश्वरी च चामुं
डा कौमारी चापराजिता॥ वाराही नारसिंही च पुनरेतास्तु भूपते॥१८॥ भैरवीं महदाद्यां तां
सिंहाद्यां धूम्रपूर्विकां॥ भीमोन्मत्तां दिकां चापि वशीकरणभैरवीं॥१९॥ मोहनाद्यां समाराध्य
शक्रादीनां युधानपि॥ एवमाराधिता काली सिद्धा भवति मंत्रिणां॥२०॥ ततः प्रयोगान् कुर्वीत म
हाभैरवभाषितान्॥ आत्मनोर्थे परस्यार्थे क्षिप्रसिद्धिप्रदायकान्॥२१॥ स्त्रीणां प्रहारं निंदां च
कौटिल्यं चाप्रियं वचः॥ आत्मनो हितमन्विच्छन् कालीभक्तो विवर्जयेत्॥२२॥ सुदृशो मदनावा
सं पश्यन् यः प्रजपेन्मनुं॥ अयुतं सोचिरादेव वाक्पतेः समतामियात्॥२३॥ दिगंबरो मुक्तकेशः
श्मशानस्थोऽधियामिनी॥ जपेद्योयुतमेतस्य भवेयुः सर्वकामनाः॥२४॥ शवहृदयमारुह्य नि
र्वासाः प्रेतभूगतः॥ अर्कपुष्पसहस्रेणाभ्यक्तेन स्वीयरेतसा॥२५॥ देवीं यः पूजयेद्भक्त्या ज
पन्नेकैकशो मनुं॥ सोचिरेणैव कालेन धरणीप्रभुतां व्रजेत्॥२६॥ रजःकीर्णभगं नार्या ध्याय
न्योयुतमाजपेत्॥ स कवित्वेन रम्येण जनान्मोहयति ध्रुवं॥२७॥ त्रिपंचारे महापीठे शवस्य
हृदि संस्थिते॥ महाकालेन देवेन मारयुद्धं प्रवर्त्तितां॥२८॥ तां ध्यायन् स्मेरवदनां विदधत्सुरतं स्व
यं॥ जपेत्सहस्रमपि यः स शंकरसमो भवेत्॥२९॥ अस्थिलोमत्वचायुक्तं मांसं मार्जारमेषयोः॥ उ
ष्ट्रस्य महिषस्यापि बलिं यस्तु समर्पयेत्॥३०॥ भूताष्टम्योर्मध्यरात्रे वश्यास्युस्तस्य जंतवः॥

मंत्र० विद्यालक्ष्मीर्यशः पुत्रैः सचिरं सुखमेधते ॥ ३१॥ योहविष्याशनरतो दिवा देवीं स्मरन्जपेत् ॥ म्रो० ८०
नक्तं निधुवनासक्तो लक्षं सः स्याद्धरापतिः ॥ ३२॥ रक्तांभोजैर्हुते मंत्री धनैर्यजति वित्तपं ॥
बिल्वपत्रैर्भवेद्राज्यं रक्तपुष्पैर्वशीकृतिः ॥ ३३॥ असृजा महिषादीनां कालिकां यस्तु तर्पयेत् ॥
तस्य स्युरचिराद्देव करस्थाः सर्वसिद्धयः ॥ ३४॥ यो लक्षं प्रजपेन्मंत्रं शवमारुह्य मंत्रवित् ॥ त
स्य सिद्धो मनुः सद्यः सर्वेप्सितफलप्रदः ॥ ३५॥ तेनाश्वमेधप्रमुखैर्यागैरिष्टं सुजन्मना ॥ द
त्तं दानं तपस्तप्तमुपास्ते यस्तु कालिकां ॥ ३६॥ ब्रह्मविष्णुशिवो गौरी लक्ष्मीर्गणपती रविः ॥
॥१५॥ पूजिताः सकला देवा यः कालिं पूजयेत्सदा ॥ ३७॥ अथ कालीमंत्रभेदा उच्यंते सिद्धिदायि
नः ॥ मायायुग्मं कूर्चयुग्मं करशांतिं विधुत्रयं ॥ ३८॥ दक्षिणे कालिके पूर्वबीजानि स्युर्विलो ॥१५॥
मतः ॥ एकविंशतिवर्णात्मा ताराद्यः पूर्ववद्द्विजः ॥ ३९॥ बिल्वमूले शवारूढे वटमूले तथैव
च ॥ लक्षं मनुमिमं जप्त्वा सर्वसिद्धीश्वरो भवेत् ॥ ४०॥ कालीकूर्चं च हृल्लेखा दक्षिणे कालिके
पदात् ॥ पुनर्बीजत्रयं वह्निवधूर्मन्वक्षरो मनुः ॥ ४१॥ यजनं पूर्ववत्प्रोक्तमेस्य मंत्रस्य मंत्रि
भिः ॥ विशेषात्सुरादीनामथमाकर्षणोक्षमः ॥ ४२॥ कूर्चद्वयं त्रयं काल्या मायायुग्मं च दक्षि
णा ॥ कालिके पूर्वबीजानि स्वाहा मंत्रो वशीकृतौ ॥ ४३॥ मंत्रराजे पुनः प्रोक्तं बीजसप्तकमुत्सृ
जेत् ॥ तिथिवर्णोमिहा मंत्र उपास्तिः पूर्ववन्मता ॥ ४४॥ ब्रह्मनरेफो वामनेत्रचंद्रारूढो मनुर्म
तः ॥ एकाक्षरो महाकाल्याः सर्वसिद्धिप्रदायकः ॥ ४५॥ बीजं दीर्घयुतं वक्री पिनाकी नेत्रसं

युतः ॥ क्रोधीशो भगवान्स्वाहा षडर्णो मंत्र ईरितः ॥४६॥ कालीकूर्चं तथा लज्जा त्रिवर्णो मनु
रीरितः ॥ क्रुं फट्‌ तस्य पंचार्णः स्वाहांतः सप्तवर्णकः ॥४७॥ एतेषां पूर्ववत्प्रोक्तं यजनं नारदा
